पुरा किल काश्यां पुष्पदन्तनामगन्धर्व्वराजो राजोद्यानेषु नक्तं प्रतिदिनमेव पुष्पाण्यपहरति। उद्यानपालास्तु प्रातः प्रातः पुष्पाण्यलभमाना राजभीता मनःपीड़ामनुभवन्तो गगनचरेण पुष्पाण्यपह्रियन्ते इति गणितशास्त्रविशारदद्वारा निर्णीय उद्यानेषु विश्वेश्वरनिर्म्माल्यानि विक्षिप्तवन्तः। स तानि पद्भ्यां स्पृष्ट्वा खेचरत्वादिनिजमहिमहीनतया विधुर उद्यानेषु स्थितः उद्यानपालैस्तु दृष्टो विश्वेश्वरालयं संगोप्य नीतः तन्महिमानञ्च स्वयमजानन् कथं स्तूयात् इति प्रतिकारेण स्तवाधिकारितामात्मनः प्रकाशयन् स्तौति। महिम्न इति। हे हर ते तव महिम्नो महत्त्वस्य परं दुर्ज्ञानविषयभिन्नं पारं पर्य्यवसानं अविदुषः अजानतो जनस्य स्तुतिर्यदि त्वयि असदृशी अयोग्या अनुचितेति यावत्। तत् तदा ब्रह्मादीनामपि गिरो वाचस्त्वय्यवसन्ना अयोग्या भवन्तु तेषामपि त्वन्महिमपाराज्ञानित्वात्। अथ यद्यपि सर्व्वेषामेव महिमपाराज्ञानित्वं तथापि सत्त्वानुरूपं प्रयाणं विहगस्येति सामर्थ्यानुरूपं यथा गरुड़स्य गतिस्तथा न चटकस्येति किं चटको न गच्छतीतिन्यायार्थसंवादेन सर्वेषामेव स्तवाधिकारित्वं प्रदर्श्य आत्मनो दर्शयति। अथेति। अथशब्दो यद्यर्थे अव्ययत्वात्। यदि स्वमतिपरिणामावधि स्वबुद्धिपरिपाकपर्य्यन्तं यथा स्यात् तथा गृणन् अर्थात् त्वां स्तुवन् सर्वो जनो

**अतीतः पन्थानं तव च महिमा वाङ्मनसयो-**
**रतद्व्यावृत्त्या यञ्चकितमभिधत्ते श्रुतिरपि ।**
**स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः**
**पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥**

अवाच्योऽनिन्द्यो भवति तदा ममापि स्तोत्रे स्तवविषये एष परिकर आरम्भः निरपवादः अपवादशून्यो भवतु । ममापि स्वमतिपरिणामावधित्वेन स्तावकत्वात् । अवपूर्व्वसद्-धातोरवसादवृत्तित्वेनैवायोग्यवृत्तित्वमवसादस्य क्रियायां अयोग्यत्वात् ।

वाच्यः शक्ये च निन्द्ये च वाच्यं स्याद्वचनेऽपिचेति मञ्जरी ।
आरम्भे च समूहे च भवेत् परिकरः पुमान् ।
सामग्र्यां परिलोके च सम्भ्रमे सज्जनेऽपि चेति व्याडिः ॥ १ ॥

अथ त्वन्महिमपारविषये ब्रह्मादीनामपि कथमज्ञानित्वमित्याह—अतीत इत्यादि । चकारो यस्मादर्थे । यस्मात् तव महिमा वाङ्मनसयोः पन्थानं अतीतः अतिक्रान्तवान् वाङ्मनसयोरविषय इति यावत् । गत्यर्थात् कर्त्तरि क्तः । वाङ्मन-सयोरिति धेन्वनडुहादित्वात् । अतो वाङ्मनोज्ञानाधीनानां ब्रह्मादीनां त्वन्महिमा ज्ञानगोचरो न भवतीति भावः । अथ यदि महिमा ज्ञानगोचरो न भवेत् तदा वेदेन कथमभिहित इत्याह अतदित्यादि । यं महिमानं श्रुतिरपि वेदोऽपि अतद्व्यावृत्त्या ब्रह्मभिन्नभेदेन घटपटादिरूपेण वाङ्मनोविषयेण चकितं सभयं यथा स्यात्तथा अभिधत्ते कथयति । ब्रह्मभिन्नभेदत्वेन कथितं अतः सभयमित्यर्थः । तच्छब्देन ब्रह्माभिधीयते । तथा च गीतायां ।

ओम् तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ इति ॥

न तत् अतत् ब्रह्मभिन्नम् । तस्य व्यावृत्त्या भेदेनेत्यर्थः । यदाह श्रुतिः— ‘अथ निष्कलो निरञ्जनो निर्भेद्यो यस्यायं प्रपञ्चो महिमा सर्व्वाधेयत्वेनानुसन्धेयः’ इति । यद्वा अतद्व्यावृत्त्या न विद्यते तस्य महिम्नो व्यावृत्तिर्भेदो यत्र एतादृशेन

**मधुस्फीता वाचः परमममृतं निर्म्मितवत-**
**स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।**
**मम त्वेतां वाणीं गुणकथनपुण्येन भवतः**
**पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥**

प्रपञ्चस्वरूपेण अभिधत्ते । सर्व्वेषां त्वन्महिमत्वाद्व्यावृत्तिशून्यता । अतो यं महिमानं वेदोऽपि चकितमभिधत्ते स महिमा कस्य स्तोतव्यः अनिर्व्वचनीयत्वात् कस्यापि नेत्यर्थः । अथ सगुणत्वेनैव निर्वचनीयत्वमिति चेदाह स कतिविधगुणः कतिविधाः किंधर्म्मावच्छिन्ना गुणा यस्य तस्य निरूपयितुमशक्यत्वात् अनिर्वचनीयत्वमिति । अथ प्रपञ्चस्वरूपेणैव निरूप्यतामित्याह कस्य विषयः कस्य प्रमाणस्य गोचरः न कस्यापि प्रत्यक्षादिप्रमाणाविषयत्वेनानिर्वचनीय इति भावः । अथ यदि कस्यापि प्रमाणस्य गोचरो न भवेत् कथं तदा स्तवारम्भः क्रियते इत्याह पदे त्विति । अर्व्वाचीने पदे चन्द्रशेखरादिरूपे साकारे कस्य मनो न पतति कस्य वचो न पतति साकारस्य वस्तुनः सर्व्वेषामेव वाङ्मनोविषयत्वात् साकारमेव स्तौमीति भावः ॥ २ ॥

अथ यद्यपि शिवः साकारावस्थायां स्तुतिविषयस्तथाप्याश्चर्य्यस्तुतिस्तुतश्चेन्मङ्गलदस्तत्र ब्रह्मादीनामपि स्तुतिर्न तस्याश्चर्य्यकारिणी किमन्येषामिति प्रतिपादयति । मध्विति । हे ब्रह्मन् हे शिव सुरगुरोर्वृहस्पतेर्वाक् वाणी मधुस्फीता माध्वीकवन्मधुराऽपि तव किं विस्मयपदं आश्चर्य्यस्थानं अपितु नैव । यतस्तव कीदृशस्य वाचो वाक्यतः परमं उत्कृष्टं अमृतं पीयूषं निर्म्मितवतः निर्म्माणकर्त्तुः । यस्य वाणी उत्कृष्टा अमृतनिर्म्माणकारणीभूता तस्य तु कथं मधुवन्मधुरा वागाश्चर्य्यपदं भविष्यतीति भावः । मधुनः पीयूषस्य उत्कृष्टास्वादजनकत्वादिति भावः । अथ तर्हि यस्य वृहस्पतेरपि वाक् नाश्चर्य्यपदं तस्य स्तवे ततोऽपि न्यूनो भवान् कथं प्रवर्त्तते इत्युपहासं जिहीर्षुः स्तवकरणकारणमाह ममेति । हे पुरमथन हे पुरारे भवतो गुणकथनपुण्येन भवद्गुणकीर्त्तनजन्यपुण्येन मम एतां वाणीं गुणरूपां पुनामि पवित्रं करोमि इति कृत्वा अस्मिन्नर्थे स्तवकरणे मम बुद्धिर्व्यवसिता व्यवसायवती उद्युक्ता इत्यर्थः । अतएव हि स्तवे प्रवर्त्ते इति भावः । 'मधु माध्वीकमद्ययो' रित्यमरः । 'स्फीतं प्रफुल्ले मधुरे प्रस्फुटे च नपुंसकमिति' व्याडिः । 'पीयूषममृतं सुधेति विस्मयोद्भूतमाश्चर्य्यमित्यप्यमरः' ॥३॥

**तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृ-**
**त्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।**
**अभव्यानामस्मिन् वरद रमणीयामरमणीं**
**विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥**
**किमीहः किङ्कायः स खलु किमुपायस्त्रिभुवनं**
**किमाधारो धाता सृजति किमुपादान इति च ।**
**अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः**
**कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥**

तवेति । हे वरद हे शिव इह तु भुवने तव यदैश्वर्य्यं प्रभुत्वं जगतां सृष्टिस्थिति-प्रलयकारिरूपं तद्विहन्तुं निरसितुं एके जडधियः जडबुद्धयः नास्तिकमीमांसका व्याक्रोशीं विप्रतिपत्तिं विदधते कुर्व्वन्ति । अथैश्वर्य्यस्य विद्यमानत्वे किं प्रमाणमित्याह ऐश्वर्य्यं कीदृशं त्रयीवस्तु वेदत्रयप्रतिपाद्यम् । अथ एकस्य ऐश्वर्य्यस्य सृष्टिस्थिति-प्रलयानां सम्बन्धे कर्त्तृत्वं कथमित्याह—पुनः कीदृशं गुणैः सत्त्वरजस्तमोभिर्भिन्नासु भेदं गतासु तिसृषु तनुषु शरीरेषु ब्रह्मविष्णुशिवरूपासु व्यस्तं विभक्तम् । गुणभेदाच्छरीर-भेदस्तद्भेदे ऐश्वर्य्यस्यापि भेदो लक्ष्यते न तु वास्तव इति भावः । अतो ब्रह्मविष्णु-शिवशरीरेण जगतां सृष्टिस्थितिप्रलयकारित्वेन वेदत्रयप्रतिपाद्यैश्वर्य्यनिरासका नास्तिक जडधिय एव । अथैतादृशी व्याक्रोशी सर्वमनोरञ्जिनी न इति प्रतिपादयन्नाह व्याक्रोशीं कीदृशीं अस्मिन् ऐश्वर्य्यविषये अभव्यानां अज्ञानिनां रमणीयां मनोरञ्जिनीं परमार्थतस्तु अरमणीं कुत्सिताम् । यद्वा अस्मिन् ब्रह्मादिशरीरे अभव्यानां असन्मतानां रमणीयाम् । तथा च सर्व्वा एव देवता मन्त्रमयीति प्रतिपन्नाः । केचिन्मीमांसका ईश्वरस्य मूर्त्तिं न मन्यन्ते अतस्तेषां ब्रह्मादिशरीरद्वारा जगदुदयादिकार्य्यैश्वर्य्ये व्याक्रोशी रमणीयैव परमार्थतोऽवेदप्रतिपाद्यत्वात् सा अरमणीया इत्यर्थः । 'स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी' इत्यमरः । वस्तु अर्थः स एव प्रतिपाद्यम् । 'गुणाः सत्वं रजस्तम' इत्यमरः । 'आक्रोशी प्रतिपत्तिः स्यादाक्रोशः क्रोध उच्यते' ॥ ४ ॥

ऐश्वर्यप्रतिपन्नानां मतमुपन्यस्य विप्रतिपत्तिप्रकारं दर्शयन् तामेव निरस्यन् स्तौति किमीह इति । हे हर अयं कुतर्कः कुत्सितः पूर्व्वपक्षः कांश्चित् हतधियो

**अजन्मानो लोकाः किमवयववन्तोऽपि जगता-**
**मधिष्ठातारं किं भवविधिरनादृत्य भवति ।**
**अनीशो वा कुर्य्याद्भुवनजनने कः परिकरं**
**यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥**

मायया विनष्टबुद्धीन् वेदविरुद्धवादिनो मीमांसकादीन् मुखरयति वाचालं करोति तत् पुनर्जगतो मोहाय नान्यत् फलम् । तं कुतर्कमेव निरासयति यतः कुतर्कः अतर्क्यै अतर्कणीयं ऐश्वर्य्यं यस्य तादृशि अपरिच्छेद्यविभवे त्वयि अनवसरेण निरवकाशतया बाधितः इति हेतुगर्भविशेषणम् । यतस्त्वयि कुतर्को नावतिष्ठते अतो जगन्मोहनमात्रं तस्य फलं नान्यदिति भावः । कुतर्कमेवाह किमीह इति । खलु उपहास्यार्थे वेदविरुद्धवादिनो जनाः वेदार्थपरिनिष्ठितान् प्रति कुतर्काभासेन उपहसन्ति । अथ इष्टसाधनज्ञानशरीरनिमित्तकारणाधारसमवायिकारणरूपसामग्रीकलापम् एव सृष्टिकर्तृत्वं तत्र तव स धाता सृष्टिकर्त्ता किमीहः सन् त्रिभुवनं सृजति । का ईहा इष्टं यस्य तस्य किमिष्टं किञ्चिदपि न इष्टाभावात् इष्टसाधनज्ञानाभावेन प्रवृत्तेरभावात् कथं सृजतीति कुतर्कः । तथा कः कायोऽस्येति किंकायः सन् सृजति । प्रलयमङ्गीकुर्वतां भवतां परमाणुमात्रावशिष्ट-तया सृष्टेः प्राक्क्षणे कस्यापि शरीरस्याभावात् शरीरसहकारिसृष्टिकर्तृत्वं बाधितमेवेति भावः । तथा क उपायो निमित्तकारणमस्य यथा घटकर्तुः कुलालस्य दण्डचक्राद्युपायः तथा सृष्टेः पूर्वं किञ्चिदपि निमित्तकारणं नास्तीति कथं सृजतीति । यत् पुनः परमाण-वोऽवशिष्टास्तेऽपि न कारणानि परमाणूनां कारणत्वानङ्गीकारात् अभ्युपगमेऽपि निमित्तत्वं नास्त्येवेति समवायित्वात् । तथा क आधारो यस्य किमाधारः यथा मर्कटादीनां सूत्रजालकर्तृत्वे तृणाद्याधारस्य कुलालानां घटकर्तृत्वे तृणाद्याधारस्य सहकारिता तथा सृष्टेः प्राक् कस्यापि वस्तुनः स्थित्यभावेनाधारस्याभावात् अनाधारस्य धातुः कथ-माधारसहकारिसृष्टिकर्तृत्वं सम्भवतीति भावः । अथ किमुपादानं समवायिकारणं यस्य यथा कपालादिकं घटस्य तथा सृष्टेः प्राग्वस्तु नास्तीति किं समवायिकारणं भवेत् अत-स्तदभावात् कथं सृष्टिरिति भावः । परमाणूनां कारणत्वमङ्गीकृत्येदमुक्तं । वस्तुत इष्टसाधन-सामग्री ईश्वरस्य सृष्टिकर्तृत्वे सहकारिणी तस्य पुनरतर्कनीयत्वाज्जडधियामेव कुतर्कः न तु ज्ञानिनां । एतदेव ईश्वरस्येश्वरत्वं इष्टादिसामग्रीमन्तरेणापि सृष्टिकर्तृत्वमिति ध्येयम् ॥५॥

इत्थं प्रतिकूलतर्कं निरस्य ईश्वरसाधकानुमानप्रकारं दर्शयन् स्तौति अजन्मान इति । हे अमरवर हे अमरश्रेष्ठ अवयववन्तोऽपि सावयवादयोऽपि लोकाः क्षित्यादयः

**त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति**
**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।**
**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥**

किमजन्मानः किं जन्महीनाः अपि तु जन्या एव सावयवत्वात् न हि जन्मव्यतिरेकी सावयवोऽस्ति निराकारस्यैवाजन्यत्वात् तेन सावयवत्वेन क्षित्यादेर्जन्यत्वमनुमितं इति भावः । एवं जन्यत्वेनानुमीयमानानां जगतां भवविधिर्जन्मविधानं किमधिष्ठातारं कर्त्तारं अनादृत्य अनपेक्ष्य भवति अपितु नैव । तथा च वासिष्ठे 'कार्य्यं सकर्त्तृकं ज्ञेयम्' इति । अथ क्षित्यादयः सावयवा जन्याः सकर्त्तृकाश्च सन्तु । तत्रेश्वरस्य कर्त्तृत्वे किं मानमिति निरस्यति अनीश इति । अनीशः ईश्वरादन्यः को जनः भुवनजनने विश्वोत्पत्तौ परिकरं आरम्भं कुर्य्यात् कोऽपि नेत्यर्थः । भूतभविष्यद्वर्त्तमानानभिज्ञानामीश्वरभिन्नानां विचित्रचतुर्दशभुवनरचनासमर्थानां भुवनजननारम्भोऽसम्भव एव । अतः हे सर्व्वज्ञ त्वमेव रचयसीति यतस्ते मन्दा मोहयुक्ता अतस्त्वां प्रति संशेरते अस्ति नास्तीति संशयं कुर्व्वते । संपूर्व्वशीधातोः संशयवृत्तित्वमनेकार्थत्वात् । शेतेरिरन्तेरादिः । 'लोकस्तु भुवने जने' इत्यमरः । 'भवो जन्मनि संसारे प्रकाशे चोद्भवो मत' इति 'आरम्भे च समूहे च भवेत् परिकरः पुमान्' इति च व्याडिः ॥६॥

एवं भगवद्विमुखान् निरस्य सर्वेषामेव प्रस्थानानां भगवत्येव साक्षात् परम्परया च तात्पर्य्यं प्रकाश्य स्तौति त्रयीति । अथेश्वरप्राप्तिसाधने नानावर्त्म वर्त्तते । तत्र त्रयी त्रयो वेदा धर्म्मब्रह्मप्रतिपादकापौरुषेयप्रमाणवाक्यं वेदः स एव ऋग्यजुःसामभेदेन त्रयी उच्यते । तेषां मते ध्यानमात्रेणैव ईश्वरो गम्यः । तथा च श्रुतिः । 'चिन्मात्रं चिन्तनापेक्षि कार्य्यकर्म्मानुयोगतः' इति । चिन्मात्रं ब्रह्म चिन्तनापेक्षि ध्यानप्राप्यं कार्य्यं जन्यं शरीरि कर्म्मानुयोगतः यागाद्यनुष्ठानेन गम्यम् । यथा श्रुत्यन्तरम् । 'न कर्म्मणा न प्रजया न धनेनैकेन त्यागेनामृतत्वमानशुः' । अत्रेश्वरध्यानमेव ज्ञानं जनयति ततो मोक्षः । अन्यत्तु सांख्यं कपिलोक्तशास्त्रं तन्मते तत्वज्ञानमेव यावत् कर्म्म नाशयति तत एव ईश्वरो गम्यः । तथा च गीतायां ।

ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुन ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परात्मनि ॥

तत्र हि यागादिसाध्यतत्वज्ञानमेव मोक्षकारणं तथा च कापिले ।

कर्म्मणा जन्यते ज्ञानं ज्ञानतो मोक्षसाधनम् ।
तदेव ब्रह्मगमनं कर्म्मयोगेन वर्त्मना ॥

अन्यत्तु योगोऽध्यात्मशास्त्रं तन्मते भोगेन यावत् कर्म्म क्षीयते ततः स्वतन्त्रेणैव तत्वज्ञानमुत्पद्यते ततो मोक्षः । तथा च वासिष्ठे ।

नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम् ॥
भोगान्ते जायते ज्ञानं स्वतस्तत्तो विमुञ्चति ।
तस्मात् कर्म्म न कुर्व्वीत मोक्षार्थी मोक्षबाधनम् ॥

अन्यत्तु पशुपतिमतं शास्त्रं पाशुपतं भगवता पशुपतिना पशुपाशविमोक्षणाय 'अथातः पाशुपतं योगविधिं व्याख्यास्याम' इत्यादि पशुपाशादिपञ्चकान्वितपञ्चाध्यायविरचितम् । एतन्मते तत्त्वज्ञानमेव मोक्षः न तु कार्य्यकारणसम्बन्धः । तदेव महेश्वर इति तत्त्वज्ञानमोक्षेश्वरनामभेदत्वं प्रतिपादितम् । तथाचोक्तम् ।

व्याचष्टे तारकं ज्ञानं स्वयं देवो महेश्वरः ।
तदेव ब्रह्म विज्ञेयं न च कारणकार्य्यता ॥

एतन्मते ज्ञानिनां नारदादीनां जीवन्मुक्तत्वं साधु । अन्यत्तु वैष्णवं विष्णुना प्रणीतं हयशीर्षपञ्चरात्रादि तन्मते यागादिसाध्य एव मोक्षः । तथा च ।

आरुरुक्षोर्मुक्तिमार्गे कर्म्म कारणमुच्यते ।
योगारूढस्य तस्यैव साक्षान्मोक्षो भवेत् स्वयम् ॥ इति ॥

एवं प्रकारेण प्रस्थाने दर्शने मते प्रभिन्ने सति एको वदति इदं परं एको वदति अदः पथ्यम् इति रुचीनां वैचित्र्यात् इच्छाविशेषाणां नानाप्रकारत्वात् ऋजुकुटिलनानापथजुषां समानवक्रपथवर्त्तिनां नृणां साक्षात् परम्परया च त्वमेवैको गम्यः । वेदवाक्यानुगृहीतमननरूपपथवर्त्ती साक्षात् अन्यपथवर्त्ती परम्परया लभते इत्येव विषयविभागः । यथा पयसां जलानां अर्णवः समुद्रः । यथा ऋजुपथजुषां

**महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः**
**कपालश्चेतीयत्तव वरद तन्त्रोपकरणम् ।**
**सुरास्तान्तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां**
**न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥**
**ध्रुवं कश्चित् सर्व्वं सकलमपरस्त्वध्रुवमिदं**
**परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।**
**समस्तेऽप्येतस्मिन् पुरमथन तैर्व्विस्मित इव**
**स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥**

गङ्गादिजलानां साक्षादर्णवो गम्यः । कुटिलपथजुषां यमुनासरस्वतीजलानां गङ्गादिप्रवेशद्वारा परम्परया समुद्रो गम्यस्तथेति भावः ॥ ७ ॥

एवं सर्व्वशास्त्रसम्मतनिराकारावस्थं संस्तुत्य भगवतः परमेश्वरस्य साकारावस्थां प्रतिपादयन् स्तौति महोक्ष इति । हे वरद महोक्षो वृद्धवृषः खट्वाङ्गं चितिकाष्ठं परशुः कुठारः अजिनं गजव्याघ्रयोश्चर्म्म भस्म अङ्गलेपकदग्धकाष्ठादिरूपपांशुः फणिनः सर्पाः कपालं मानुषशिरोऽस्थि तव इयत् एतावत् तन्त्रोपकरणं प्रधानसामग्री । सुरास्तु इन्द्रादयः पुनः भवद्भ्रूप्रणिहितां तव भ्रूविक्षेपमात्रेण समर्पितां तां तां अनिर्व्वचनीयां इन्द्रत्वादिरूपां ऋद्धिं सम्पत्तिं विदधति धारयन्ति । महोक्षादिसामग्रीदर्शनात् त्वमतिदरिद्रः तव सेवनया इन्द्रादयो देवाः समृद्धा इति । भेदकस्तुशब्दः । अथ यस्य दृष्टिपातेनैव देवाः समृद्धाः तस्य इयत् तन्त्रोपकरणं कथं इत्याह––नहीति । हि यस्मात् आत्मारामं जनं परमेश्वररूपं विषया इन्द्रियार्थाः शब्दस्पर्शरसरूपगन्धाः त एव मृगतृष्णा मरीचिकावत् मिथ्यारूपा न भ्रमयति न मोहयति । आत्मनि ब्रह्मण्येव चिदानन्दे आरमते क्रीडति तस्य तव इन्द्रियार्थाः शब्दस्पर्शादिविषया यतो मृगतृष्णादिवन्मिथ्या अतः कथं मोहजनका भविष्यन्ति । अतो बाह्यवस्तुनि अनास्थातः निन्द्यत्वप्रतिपादकमहोक्षाद्युपकरणधारणेन सारूप्याकाङ्क्षिवञ्चनमेव प्रयोजनं मन्यामहे इति भावः । 'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे' इत्यमरः ॥ ८ ॥

एवं परमेश्वरस्य सगुणनिर्गुणभावं प्रकाश्य संप्रति स्तुतेर्नानाप्रकारं दर्शयन् स्तौति ध्रुवमिति । हे पुरमथन हे हर कश्चित् साङ्ख्यमतानुसारी सर्व्वं जगत् ध्रुवं

**तवैश्वर्य्यं यत्नाद्यदुपरि विरिञ्चिर्हरिरधः**
**परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः ।**
**ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश यत्**
**स्वयन्तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥**

नित्यं गदति । जगत् सदेवाभिव्यक्तं नचासदुत्पद्यते न च सद्विनश्यति उत्पत्तिविनाशयोराविर्भावतिरोभावरूपत्वादित्येकः पक्षः । अपरस्तु कश्चित् सकलं जगत् अध्रुवं अनित्यं क्षणिकमिति गदति । नह्यसतः स्थिरत्वं सम्भवति अर्थक्रियाकारित्वं हि सत्त्वं ततश्चैकस्मिन्नेव क्षणे अर्थक्रियासमाप्तेः उक्तलक्षणेऽर्थक्रियाकारित्वाभावात् सत्त्वमेव इति द्वितीयः पक्षः । परो नैयायिकः समस्तेऽप्येतस्मिन् जगति ध्रौव्याध्रौव्ये नित्यत्वानित्यत्वे व्यस्तविषये विभक्तधर्म्मे गदति । आकाशादि नित्यं अनित्यं घटपटादि अनित्यानामुत्पत्तिविनाशौ स्तः न तु नित्यानामिति । तैर्नित्यानित्यतदुभयप्रकारैस्त्वां स्तुवन् विस्मित इव जातचमत्कार इव न जिह्नेमि नाहं लज्जे । यथा कश्चित् अद्भुतं दृष्ट्वा विस्मयं प्राप्तः लोकहास्यमगणयित्वा विचेष्टते तथाहमपि नानामतदर्शनादीश्वरस्य नित्यत्वानित्यत्वानामन्यतमत्वेन निर्णेतुमशक्तः सर्वप्रकारेण स्तुतिं कुर्वन् परमार्थाज्ञानित्वेन लज्जायोग्योऽपि न लज्जे इति भावः । अथ परमार्थमजानन् कथं स्तौषीत्याह खलु मुखरता वाचालता धृष्टा प्रगल्भा सैव वलात् मां प्रवर्त्तयति अतः सैव लज्जामपहरतीति भावः ॥ ९ ॥

पुरा किल ब्रह्मविष्णू अहमेव प्रधानमिति परस्परं विवादं कृतवन्तौ तयोर्विवादभञ्जनार्थं भगवान् महेश्वरस्तेजःपुञ्जतया निबध्यान्तरत्वेनाविर्भूतः तं दृष्ट्वा विस्मयं गतवन्तौ ब्रह्मविष्णू किमिदमिति विभाव्य निश्चयं कर्त्तुमूर्द्ध्वाधो गतवन्तौ तन्निश्चयासमर्थौ स्वात्मनि अहङ्कारं मन्यमानौ तमेव प्रधानमिति मत्वा स्तुवन्तौ सन्तौ स भगवान् स्वयमेव प्रत्यक्षतां गतः तदैव स तेजःपुञ्जो लिङ्गरूपेणाविर्भूत इति पुराणकथामुद्भावयन् स्तौति तवेति । हे गिरिश हे शिव अनलस्कन्दवपुषः अग्निपुञ्जशरीरस्य तव यत् ऐश्वर्य्यं तेजोमयत्वेनाविर्भूतस्थूलरूपं तत् परिच्छेत्तुं इयत्तामवधारयितुं उपरि ऊर्द्ध्वं विरिञ्चिर्ब्रह्मा अधस्तात् हरिर्विष्णुः यत्नात् सर्वयत्नेन यावद्गन्तुं शक्तौ

अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥

तावदेव यातौ गतावपि अर्थात् परिच्छेत्तुं अनलं असमर्थौ । ततस्तदनन्तरं कायिकसेवारूपभक्तिमानसिकसेवारूपश्रद्धाभरेणातिशयेन गुरु श्रेष्ठं यथा स्यात् तथा गृणद्भ्यां स्तुवद्भ्यां ताभ्यां ब्रह्मविष्णुभ्यां यत् यस्मात् भगवान् स्वयमेव तस्थे आत्मानं प्रकाशितवान् न तु तयोः प्रयत्नेन अतस्तवानुवृत्तिः सेवा किं न फलति अपि तु फलत्येव अतस्तव सेवातोऽवश्यमेव कृतकृत्यो भवतीति भावः । 'स्कन्दः स्यान्नृपतावंशे सम्प्रदायसमूहयोरिति' मेदिनी । ताभ्यां इति श्लाघह्नुङस्थाशपां ज्ञीप्स्यमान इति सम्प्रदानम् । 'भरोऽतिशयभारयोरिति' व्याडिः ॥ १० ॥

पुरा किल रावणेन नवभिर्निजशिरोभिः स्वहस्तकर्त्तनैः शम्भोः पादपद्मोपहारं कृतमुद्भावयन् स्तौति अयत्नादिति । हे त्रिपुरहर दशास्यो रावणः न विद्यते वैरस्य विरोधस्य व्यतिकरः कारणं दर्पादिकं यत्र विरोधकारणशून्यं त्रिभुवनं स्वर्गमर्त्यपातालं अयत्नात् व्यापारव्यतिरेकेण आसाद्य प्राप्य रणाय युद्धाय कण्डूः खर्जूरतिशयस्पृहा तया परवशान् तदधीनान् बाहून् विंशतिभुजान् यत् अभृत धारितवान् इदं स्थिराया निश्चलायास्त्वयि भक्तेर्विस्फूर्जितं प्रभावः । भक्तेः कीदृश्याः शिरांस्येव पद्मश्रेणी तया रचितः कल्पितश्चरणाम्भोरुहयोः पादपद्मयोः बलिरुपहारो यस्यां तथा । एतेन तत्पराक्रमं श्रुत्वा सर्व्वे वीरा दर्पादिकं त्यक्तवन्त इति अनायासेन विरोधकारणशून्यत्रिभुवनपतित्वमापन्नस्य रावणस्य प्रतिमल्लाभावेन युद्धनिवार्य्यमाणरणकण्डूनां युद्धाभावादेव विद्यमानत्वात् तद्विशिष्टबाहुधारणं त्वयि स्थिरभक्तिसम्पादितमिति ध्वनितम् । 'कारणे च समूहे च भवेद्व्यतिकरः पुमानिति' व्याडिः । 'कण्डूः खर्जूश्च कण्डूया' इत्यमरः । 'बलिः पूजोपहारः स्यात् बलिर्दानवपुङ्गवः । वलिः स्त्रीमध्यभागोऽपीति' गदसिंहः ॥ ११ ॥

**अमुष्य त्वत्सेवासमधिगतसारं भुजवनं**
**बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।**
**अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि**
**प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥१२॥**
**यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-**
**मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।**
**न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-**
**र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥**

पुरा किल भगवत्प्रसादासादितप्रचुरबाहुबलेन रावणेन एकदा मोहात् प्रतिदिनमेव सेवार्थं कथं कैलासे आगच्छामि कैलाससमेतं शिवं लङ्कायामेव नेष्यामीति मत्वा कैलासमुत्पाटयितुमारब्धं ततस्तदाकर्षणकम्पितकैलासस्था पार्व्वती भीता शिवमालिङ्गितवती भगवता किञ्चित् क्रोधेन कैलासस्थित्यर्थं अङ्गुष्ठाग्रं शनैर्व्यापारितं तावन्मात्रेणैव रावणो रसातलं प्राप्तः पुनः करुणया तेनैव भगवता समुद्धृत इति पुराणोक्तरावणपराभवमुद्भावयन् स्तौति अमुष्येति । हे हर त्वत्सेवया समधिगतः प्राप्तः सारो बलं येन तादृशं भुजवनं बाहुसमूहं प्राप्य त्वदधिवसतौ त्वदीयावासे कैलासेऽपि विक्रमयतः बलादिदमुत्पाट्य लङ्कां नेष्यामीत्यभिप्रायेण व्यापारयतोऽमुष्य रावणस्य प्रतिष्ठा स्थितिः त्वयि अलसं यथा स्यात् तथा चलितं प्रेरितं अङ्गुष्ठशिरः अङ्गुष्ठाग्रं येन तादृशि सति पातालेऽपि अलभ्या अप्राप्या आसीत् । अथ यत्प्रसादात् प्राप्तबलो रावणस्तमेव भगवन्तं कथं विस्मृतवानित्याह—ध्रुवं निश्चितं उपचितो धनादिसमृद्ध्या वृद्धिं गतः खलः क्रूरो जनः मुह्यति मूढत्वं याति स्वोपचयकारणमपि न गणयतीत्यर्थः । चलितेति इनि दीर्घाभावः । संज्ञापूर्व्वको विधिरनित्य इति न्यायात् ॥ १२ ॥

इदानीं भगवत्सेवया बाणासुरस्य समृद्धिर्जातेति दर्शयन् स्तौति यदिति । हे वरद बाणोऽसुरः सुत्राम्ण इन्द्रस्य परमोच्चैः सतीं अतिशयोच्चतया विद्यमानामपि

**अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-**
**विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः ।**
**स कल्माषः कण्ठे तव न कुरुते न श्रियमहो**
**विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥**

ऋद्धिं॰सम्पत्तिं अधश्चक्रे जितवान् तत् अन्यत्र चित्रमपि त्वच्चरणयोर्व्वरिवसितरि पूजके तस्मिन् बाणासुरे न चित्रं आश्चर्य्यम् । कथमित्याह—त्वयि शिरसोऽवनतिर्नमस्क्रिया कस्यै उन्नत्यै समृद्धये न भवति अपि तु सर्व्वस्यै एव भवत्येवेति । त्वच्चरणयोर्या नमस्क्रिया मोक्षस्यापि जनयित्री तस्या इन्द्रसम्पत्त्यधःकरणे कियदाश्चर्य्यमिति भावः । इन्द्रसम्पत्त्यधःकरणमेव हेतुगर्भविशेषणमाह बाणः कीदृशः परिजनत्वेन विधेयं वश्यं त्रिभुवनं स्वर्गमर्त्यपातालं येन तादृशः । इन्द्रस्य केवलं स्वर्गो वश्यः अस्य पुनस्त्रिभुवनमिति अतोऽयमिन्द्रस्य ऋद्धिं जितवानिति भावः । वरिवस्यधातुः कण्ड्वादौ पूजायां वर्त्तते ॥ १३ ॥

इदानीं समुद्रमथनजातकालकूटविषभक्षणमुत्थापयन् स्तौति अकाण्डेति । हे त्रिनयन हे शिव विषं गरलं संहृतवतः पीतवतस्तव कण्ठे यः कल्माषः कालिमा आसीत् स श्रियं शोभां न कुरुते इति न अपि तु कुरुत एव । अथ भगवान् विषपानं महदनर्थहेतुं जानन्नपि कथं पीतवानित्याह तव कीदृशस्य अकाण्डेऽनवसरे असमये विषोर्म्मिवेगात् सम्भावितो यो ब्रह्माण्डक्षयः ब्रह्माण्डनाशस्तस्मात् चकिता भीता देवासुरा इन्द्रबलिप्रभृतयस्तेषु या कृपा दया तया विधेयस्य वश्यस्य । अन्यस्यैतद्विषपानसामर्थ्यं नास्तीति । ब्रह्माण्डप्रलयकर्त्तापि परकर्त्तृकप्रलयात् ब्रह्माण्डरक्षणाय विश्वलयकरणोद्यतं विषं आत्मनि असाधारणप्रलयकर्त्तृत्वसंस्थापनाय देवासुरदयाव्याजेन स्वयमेव पीतवानिति भावः । अथात्र स कल्माषः विषप्रकारत्वेन दुष्टः स कथं भगवता धृत इत्याह भुवनानां भयभङ्गे त्रासनाशे व्यसनिनः व्यापारयतो जनस्य विकारोऽपि श्लाघ्यः कार्य्यः । जगदुपकारकृतं दूषणमपि भूषणमिति ध्वनितम् । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिष्वि' त्यमरः ॥ १४ ॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्त्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५ ॥
मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥

इदानीं कामदेवनिग्रहमुत्थापयन् स्तौति असीति । हे ईश शिव यस्य कामस्य विशिखा बाणाः सदेवासुरनरे देवासुरमनुष्यसहिते जगति क्वचिदपि असिद्धार्था अकृतकार्य्याः सन्तो न निवर्त्तन्ते सर्व्वत्रैव कृतकार्य्या अतो नित्यं जयिनः सदा जयशीलाः । यस्येति विशेषणं वा । स स्मरः कामः त्वां इतरसुरसाधारणं यथा अन्ये देवास्तदधीनास्तथा त्वमपीति मत्वा अन्यदेवतुल्यं पश्यन् स्मर्त्तव्यात्मा स्मरणमात्रविषय आत्मा शरीरं यस्य तादृशो विनष्टशरीरोऽभूत् । पश्यन्निति लक्षणहेत्वोः क्रियायामिति शन्तृङ् । तेन यथा अद्वैतं पश्यन् रामं आप्नुयादिति रामप्राप्तौ अद्वैतदर्शनं हेतुः तथा साधारणत्वेन दर्शनमेवात्मविनाशकारणमिति ध्वनितम् । अथान्यदेवतातो विशिष्टत्वमस्याजानतः कामस्य साधारणतया दर्शनं यदि शरीरनाशकं तदा अन्येषामपि अज्ञानिनां विशिष्टतया अपश्यतां कथमेवं न कृतमित्याह नहीति ।हि यस्मात् वशिषु जितेन्द्रियेषु जनेषु परिभवः तिरस्कारः पथ्यो न भवति न हितकारी भवति केष्वपि जितेन्द्रियेषु परिभवो न पथ्यः किंपुनः परमवशिनां वरे परमेश्वरे त्वयि चित्तविकाररूपतिरस्कारकारिणः कामस्य मङ्गलमित्यर्थः । 'अनादरः परिभवः परिभावस्तिरस्क्रिया' इत्यमरः ॥ १५ ॥

अथैकदा एको राक्षसो ब्रह्माणमाराध्य जगत् क्षयं नयामीति वरं वव्रे ततो ब्रह्मा कालान्तरे दास्यामीति वदन् तस्थे । ततः सर्व्वे देवा एतद्विषयचकितमानसा

**वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः**
**प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।**
**जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-**
**त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७ ॥**

हरमुपगम्य स्तुवन्तः सर्व्वमाचख्युः । तत्कथाश्रवणजातकुतूहलः हरो राक्षसस्य वरदाननियमितकालहरणार्थं यन्नृत्यं कृतवान् तज्जगद्रक्षणार्थमेव इति पुराणकथामुद्भावयन् स्तौति महीति । हे ईश त्वं जगद्रक्षायै नटसि नृत्यसि । जगन्ति पुनस्तव ताण्डवनटनाघातयोगात् संशयापन्नानीति प्रकाशयति । नृत्यतस्तव पादाघातात् पादाघातं प्राप्य मही पृथिवी सहसा तत्क्षणमेव प्रलयकाल इति संशयपदं संशयस्थानं व्रजति प्राप्नोति । तथा विष्णोः पदं आकाशं भ्राम्यत् चन्द्रसूर्य्यभ्रमणेन भ्रमदिव । कीदृशं तव भुजा एव परिघा अतिसुवृत्तपीवरदृढदीर्घास्तैः रुग्णाः पीड़िता ग्रहगणाः सूर्य्यादयो यत्र तादृशम् । यद्वा भ्राम्यद्भिर्भुजपरिघैः रुग्णा ग्रहगणा यत्र तादृशमाकाशं संशयं गच्छतीति पूर्व्वेणान्वयः । यद्यपि वियद्विष्णुपदमिति कोशे संहितक्रमोक्तविष्णुपदोयं शब्द आकाशवचनस्तथापि भूरिप्रयोगदर्शनात् विगृहीतक्रमोक्तोऽपि आकाशपर्य्याय इति भट्टिटीकायां व्याख्यातमिति । तथा द्यौः स्वर्गः अनिभृता या जटास्ताभिस्ताड़ितस्तटः प्रान्तभागो यस्याः तादृशी सती दौस्थ्यं मुहुर्दुस्थतां याति । ननु सर्व्वज्ञो भगवान् जगदपायमगणयन् किमित्येवं नृत्यति अत आह नन्विति । अहो विभुता प्रभुता वामैव प्रतिकूलैव जगतोऽनुकूलाचरणे किञ्चित् प्रतिकूलता भवत्येव 'राजराक्षसन्यायात्' । यथा राक्षसेन भोक्तुमारब्धस्य राज्यस्य रक्षणार्थं राक्षसवधाय गच्छतो राज्ञः सहचरसेनाभिर्ग्रामस्य कस्यचित् पीड़नात् प्रतिकूलतेति ॥ १६ ॥

इदानीं गङ्गाधारणेन भगवच्छरीरमहत्त्वं प्रकटयन् स्तौति वियदिति । हे ईश यो वारां प्रवाहः गङ्गाजलप्रवाहः स वियद्व्यापी मन्दाकिनीसंज्ञया आकाशव्यापकः । कीदृशः तारागणेन नक्षत्रवृन्देन स्वान्तःपातिना गुणिता शुभ्रत्वादिगुणसजातीयत्वात् वर्द्धिता फेनोद्गमरुचिर्य्यस्य तादृशः । यद्वा तारागणेन गुणितः संख्यातो यः फेनस्तस्योद्गमेन रुचिर्यस्य असंख्यफेनोद्गमरुचिरित्यर्थः । यद्वा तारागणानां यो गुणः

**रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो**
**रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।**
**दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-**
**र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥**

श्वेतत्वं तद्विशिष्टानां फेनानां उद्गमेन रुचिर्यस्य । गुणशब्दादस्तयर्थे इतच् तमादित्वादिति । सोऽयं वारां प्रवाहस्ते तव शिरसि पृषतलघुदृष्टः पृषतात् बिन्दोरपि लघु अल्पं यथा स्यात् तथा जनैर्दृष्ट उपलब्धः । तेन पश्चात् पृथिव्यामागतेन प्रवाहेन जगत् महीमण्डलं जलधिवलयं द्वीपाकारञ्च कृतम् । अगस्त्येन समुद्रेषु पीतेषु पुनर्भगीरथानीतगङ्गाजलेन तेषां पूरणात् समुद्राणां जलधित्वेन जलधिरेव वलयः वेष्टनं यस्य तादृशं कृतम् । तथा तज्जलपूरितसमुद्रैरखण्डमहीतलस्य सप्तधा खण्डितत्वात् जम्बूद्वीपादि सप्त आकारा रूपाणि यस्य तादृशं कृतमिति । अनेनैव प्रकारेण तव वपुः शरीरं दिव्यं अलौकिकं धृतमहिम च । सर्वेभ्यो महत्तरं अतिबृहच्च उन्नेयं ज्ञातव्यमित्यर्थः । यस्य शिरसि आकाशव्यापकसमुद्रपूरकजलप्रवाहो बिन्दुतोऽपि अल्पदृष्टः स्यात् तस्य तव शरीरियत्ता अनवधारणीया इत्यनुमीयत इति भावः । 'पृषन्ति बिन्दुपृषतामि' त्यमरः । अत्र जगच्छब्दो महीमण्डलमात्रोपलक्षणः द्वीपादिविशेषणात् ॥ १७ ॥

इदानीं त्रिपुरदाहमुद्भावयन् स्तौति रथ इति । हे ईश त्रिपुरतृणं दिधक्षोर्दग्धुमिच्छोस्तव कोऽयमाडम्बरविधिः परिपाटी । महत्प्रयोजनमुद्दिश्यैव महत्परिपाटी क्रियते न हि नखच्छेद्ये वस्तुनि लोकाः कुठारं परिगृह्णन्ति । अतस्त्वदनायासनाश्यत्रिपुरदाहे एतादृशी परिपाटी नोचितेति कोऽयमित्युक्तम् । अनायासनाश्यत्वात् त्रिपुरे तृणरूपकमित्यर्थः । परिपाटीमेवाह त्रिपुरदाहे क्षोणी पृथिवी तव रथः स्यन्दन आसीत् एवं शतधृतिरिन्द्रो यन्ता सारथिरासीत् अगेन्द्रः पर्व्वतप्रधानः मेरुः धनुरासीत् । अथोशब्दः अथशब्दवदव्ययः वाक्यभेदार्थः । चन्द्रार्कौ चन्द्रसूर्य्यौ रथाङ्गे चक्रे आस्ताम् । रथचरणं चक्रं पाणौ हस्ते यस्य तादृशो विष्णुः शरो बाण आसीत् । इति शब्द एवंप्रकारार्थः । इच्छामात्रेण त्रिभुवनं संहृतवतस्तव एवंप्रकारेण रणसामग्रीरचनेन किं प्रयोजनमिति भावः । एवमाक्षिप्य परिहरति विधेयैरिति । खलु निश्चितं प्रभुधियः प्रभोरीश्वरस्य बुद्धयः परतन्त्राः पराधीना न भवन्ति किन्तु स्वतन्त्रा एव । कीदृश्यः विधेयैराज्ञावशैर्द्रव्यैः क्रीडन्त्यः न हि क्रीडायां प्रयोजनाद्यपे-

**हरिस्ते साहस्रं कमलबलिमाधाय पदयो-**
**र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।**
**गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा**
**त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९ ॥**
**क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां**
**क्व कर्म्म प्रध्वस्तं फलति पुरुषाराधनमृते ।**
**अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं**
**श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्म्मसु जनः ॥ २० ॥**

क्षास्ति । अनायासेन सर्व्वं कर्त्तुं क्षमस्य तव लोकवदीहमानबुद्धेः न किञ्चिदप्यनुचितमिति भावः । 'आडम्बरस्तूर्य्यरवे परिपार्श्वां गजस्वने' इति शाब्दिकनरसिंहः । 'परतन्त्रः पराधीनः परवान् नाथवानपि' इत्यमरः । 'पुरुहूतः शतधृतिर्जिष्णुर्देवपतिस्तथेति' मञ्जरी ॥ १८ ॥

इदानीं विष्णोरतिशयभक्तिदर्शनात् चक्रदानमाह हरिरिति । हे त्रिपुरहर हे शिव हरिर्विष्णुस्ते तव पदयोश्चरणयोः साहस्रं सहस्रसंख्याकं कमलबलिं पद्मपूजोपहारं सहस्रसंख्याकपूजोपहारं पद्ममिति यावत् आधाय एकत्रीकृत्य अथ तस्मिन् कमले एकोने एकहीने सति यत् निजं स्वकीयं नेत्रकमलं नयनपद्मं उदहरत् सहस्रपूरणार्थं निजचक्षुःपद्ममुत्पाटितवान् असौ भक्त्युद्रेकः भक्तेरतिशयत्वं स्वयमेव चक्रवपुषा चक्रशरीरेण परिणतिं निष्पत्तिं गतः सन् त्रयाणां जगतां रक्षायै स्वर्गमर्त्त्यपतालानां रक्षायै जागर्त्ति प्रवर्त्तते । अत्रेयं पुराणकथा । पुरा किल विष्णुः सहस्रपद्मेन प्रत्यहं शिवं पूजितवान् तत्रैकस्मिन् दिने विष्णोर्भक्तिं जिज्ञासुना हरेण एकत्रीकृतसहस्रकमलात् एकं कमलं हृतम् । ततः सहस्रकमलदानसमये तत्रैकोनं ज्ञात्वा तदानीमन्यदप्राप्यं बुद्ध्वा नियमभङ्गभयेन भक्त्यतिशयत्वाच्च निजचक्षुःपद्ममुत्पाट्य कमलानां सहस्रं पूरयित्वा शिवचरणयोर्ददौ । अनया भक्त्या तुष्टः शिवः जगद्रक्षाकरणयोग्यसुदर्शननामचक्रं विष्णवे ददौ । तेनैव चक्रेण विष्णुर्जगद्रक्षतीति भक्तिरेव मूर्त्तिमच्चक्रं भूतेति ॥ १९ ॥

सम्प्रति भगवतो यज्ञफलदानकर्त्तृत्वमुद्भावयन् स्तौति क्रताविति । क्रतौ यज्ञे सुप्ते विनष्टे सति क्रतुमतां याज्ञिकानां जनानां फलयोगे यज्ञफलेन सह यज्ञकारि-

**क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-**
**मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।**
**क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो**
**ध्रुवं कर्त्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥**

संयोगे त्वं जाग्रदसि त्वं यज्ञफलदायको भवसि । यतः पुरुषाराधनमृते परमपुरुषस्य ईश्वरस्य भवत आराधनं विना प्रध्वस्तं कर्म्म यज्ञादि क्व कस्मिन् काले देशे पुरुषे वा फलति फलदं भवति अपितु नैव । तस्मात्तवाराधनमेव यज्ञफलकारणमिति भावः । अतः कारणात् यज्ञकारी जनः त्वां क्रतुषु यज्ञेषु फलदानप्रतिभुवं फलदानकर्त्तारं संप्रेक्ष्य ज्ञात्वा श्रुतौ वेदवाक्ये श्रद्धामादरं बद्ध्वा कृत्वा कर्म्मसु यज्ञेषु दृढपरिकरो दृढा- रम्भो भवति । अयम्भावः यागस्तु क्रिया सा च उत्पत्तिविनाशधर्म्मयोगादनित्या फलञ्च कालान्तरे लोकान्तरे च लभ्यं ततश्च विनष्टे यागे यागफलं कथं लभ्यते इत्याशङ्कायां यज्ञकर्म्मानुष्ठाने परमपुरुषाराधनमेव यागफलदमिति निश्चित्य 'स्वर्गकामोऽश्वमेधेन यजे- तेत्यादि' यागप्रवर्त्तकवेदवाक्ये आदरं कृत्वा याज्ञिको लोकान्तरफलमपि कर्म्म आरभते इति यज्ञफलदाने भवानेव कर्त्तेति संक्षेपः । 'आरम्भे च समूहे च भवेत् परिकरः पुमानि'ति व्याडिः । 'प्रतिभूर्नायकः कर्त्ता क्रियानुष्ठानदर्शक' इति शाब्दिकनरसिंहः ॥ २० ॥

इदानीं परमपुरुषमहादेवाराधनव्यतिरेकेण समस्तोपकरणान्वितोऽपि यागो नष्ट इति प्रदर्शयन् स्तौति क्रियेति । हे शरणद हे महादेव यत्र क्रतौ दक्षः प्रजापतिः क्रतुपतिर्यज्ञाधिकारी सोऽपि क्रियासु दक्षः यज्ञक्रियाकुशलः तथा तनुभृतां शरीरिणा- मधीशः राजा तथा यत्र ऋषीणां वसिष्ठादीनामार्त्त्विज्यं ऋत्विक्कर्म्म तथा यत्र सुरगणा ब्रह्मादयः सदस्या विधिदर्शिनः एवम्भूतस्यापि क्रतोर्यज्ञस्य क्रतुफलविधानव्य- सनिनो यज्ञफलविधानरसिकात् त्वत्तो भवत्सकाशात् भ्रंशः नाश इति । कथमित्याह हि यस्मात् श्रद्धाविधुरं श्रद्धाविहीनं यथा स्यात् तथा क्रियमाणा मखा यज्ञाः कर्त्तुर्यज्ञकारिणो अभिचाराय हिंसार्थं भवन्तीति ध्रुवं निश्चितमित्यर्थः । यत एवं साधनसम्पन्नोऽपि यागस्तवाराधनविरहात् त्वत्तो नष्टस्तत एव यज्ञफलं तवाराधनकारण- मिति भावः । दक्षे हि त्वामनादृत्यान्यदेवानाहूय यज्ञे प्रवृत्ते निजकन्यया सत्या पत्यपमानमसहमानया शरीरत्यागेन जनितक्रोधेन शिवेन यज्ञो ध्वस्त इति कालिका- पुराणसंवादः । 'हीने कुण्डे च वैकल्ये विधुरं वाच्यवद्भवेदिति' चन्द्रः ॥ २१ ॥

**प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं**
**गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।**
**धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं**
**त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥**
**स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्**
**पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।**
**यदि स्त्रैणं देवी यमनियतदेहार्द्धघटना-**
**दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २३ ॥**

पुरा किल ब्रह्मा निजदुहितरं सन्ध्यामतिसुन्दरीं वीक्ष्य कामुकोऽतिक्रान्तुमुपचक्रमे ततोऽपि हरिणी भूत्वा धावन्तीं सन्ध्यां हरिणशरीरधारिणो ब्रह्मणो रन्तुमनुधावतोऽयोग्यजिहीर्षया तस्मिन् मृगरूपे ब्रह्मणि धनुष्पाणिः शिवः व्याधरूपेणानुगतः सन् बाणं क्षिप्तवान् सोऽपि मृगः पलायमान आकाशे गतोऽपि तेन बाणेन भिन्न आकाशे तारागणरूपेण दृश्यते इति मार्कण्डेयपुराणसंवादेन स्तौति प्रजेति । हे नाथ हे हर धनुष्पाणेर्धनुर्हस्तस्य तव मृगव्याधरभसः मृगे व्याधस्येव उद्यमः ताड़नानुरागो वा अद्यापि एवम्भूतं प्रजानाथं ब्रह्माणं न त्यजति अद्यापि मृगरूपे ब्रह्मणि व्याधरूपस्य तव बाणव्यापार आस्ते इत्यर्थः । प्रजानाथं कीदृशं अभिकं कामुकम् । पुनः कीदृशं ऋष्यस्य वपुषा मृगशरीरेण रोहिद्भूतां मृगीभूतां स्वां दुहितरं निजकन्यां प्रसभं बलात्कारेण रिरमयिषुं रन्तुमिच्छुम् । पुनः कीदृशं त्रसन्तं भीतं अतो दिवमपि यातं तथापि सपत्राकृतं बाणव्यथितम् । 'सपत्रनिष्पत्राभ्यामतिव्यथने', इति तमादित्वात् डाचि निपातः । 'कामुकोऽभिकमि'त्यमरः । 'गोकर्णपृषतैणर्ष्यरोहिताश्चमरो मृगा' इत्यमरः । 'उद्यमे चानुरागे च निर्जने रभसः पुमानिति' व्याडिः ॥ २२ ॥

इदानीं भगवतः शरीरेण पत्नीशरीरघटनायां सत्यामपि स्त्रीवशतां निरस्यन् स्तौति स्वलावण्येति । हे पुरमथन हे वरद देवी पार्व्वती स्वलावण्याशंसा स्वकीयसौन्दर्य्यप्रशंसाकारिणी सती धृतधनुषं धनुर्द्धरं पुष्पायुधं कामदेवं पुरः साक्षात् त्वया

**श्मशानेष्वाक्रीडाः स्मरहर पिशाचाः सहचरा-**
**श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।**
**अमङ्गल्यं शीलं तव भवतु नामैवमखिलं**
**तथापि स्मर्त्तॄणां वरद परमं मङ्गलमसि ॥ २४ ॥**

तृणवत् प्लुष्टं दृष्टिपातेनैव दग्धं दृष्ट्वापि यदि यमनियतदेहार्द्धघटनात् संयमासादित-शरीरार्द्धदानरूपचेष्टातः त्वां स्त्रैणं स्त्रीवशमवैति जानाति बत खेदे सर्व्वा युवतयः स्त्रियो मुग्धा अज्ञा इत्यद्धा निश्चितमेव । निश्चये अद्धा अव्ययम् । मम सौन्दर्य्यं दृष्ट्वा भगवान् मां देहार्द्धे कृतवान् । अथवा मम लावण्यवशीभूतो भगवान् निजदेहार्द्धं मह्यं दत्तवानिति गर्व्वं यदि कामदमनं दृष्ट्वापि करोति भ्रान्तचित्तत्वात् साधारण-स्त्रीस्वभावं गतवती पार्व्वती कथमन्यस्त्रीजनतः अधिका भवेदिति सर्व्वा युवतयो मुग्धा इत्युक्तम् । न हि मन्मथघाती पुरुषः क्वापि स्त्रीवशः स्यात् स्त्रैणतां प्रति मन्मथाच्छन्नत्वेन कारणत्वात् । अह्नाय झटिति दग्धं दृष्ट्वा इत्यन्वयः । स्राग्झटित्यञ्ज-साह्नायेत्यव्ययेऽमरः । स्त्रैणमिति स्त्रीपुंभ्यां नणञ्नणाविति तमादित्वात् स्त्रियो णन् प्रत्ययः । 'स्यात् पुरः पुरतोऽग्रतः' इत्यव्ययेऽमरः । 'तत्त्वे त्वध्वाञ्जसाद्वयमित्य-व्ययेऽमरः । तत्त्वं निश्चितं यमेन संयमेन नियतो वशीकृतो यो देहस्तदर्द्धे देव्याः शरीरार्द्धस्य घटनात् योजनात् । यमनियतेत्यनेन तस्याभिलाषुकत्वाशङ्का निराकृतेति व्याख्यान्तरम् ॥ २३ ॥

अन्यपुरुषो यद्यमङ्गलशीलो भवति तदा स निन्द्यः भगवांस्तु सदा अमङ्गल-शीलोऽपि स्मर्त्तॄणां परममङ्गलद एवेति पुरुषान्तरादाधिक्यमुद्भावयन् अपूर्व्वपुरुषतामाह श्मशानेष्विति । हे स्मरहर कामनाशक हे वरद यद्यपि तव एवम्भूतं अमङ्गल्यं अकल्याणकारणं शीलं स्वभावो भवतु तथापि तव अखिलं नाम समस्तनामधेयं उग्रः कपालभृत् श्मशानवासीत्यादिरूपं स्मर्त्तॄणां स्मरणकारिणां त्वं परमं मङ्गलं उत्तम-कल्याणकरोऽसि । अमङ्गल्यमेवाह श्मशानेषु मृतदाहस्थानेषु आक्रीडा भ्रमणखेल-नादिक्रीडनम् । पिशाचाः प्रेताः सहचराः अनुचराः । चिताभस्मभिरालेपः शरीरलेपनम् । नृकरोटीपरिकरः मनुष्यशिरोऽस्थिसमूहः स्रक् माला यस्य एतादृ-शव्यापारस्तस्य शीलं अमङ्गल्यमेवेति । ईश्वरस्य एतादृशव्यापारे सत्यपि तत्तद्व्यापारजन्य-दोषभाक्त्वं नास्त्येव महापुरुषत्वादिति सर्व्वोत्कृष्टत्वं प्रतिपादितमिति भावः । 'शिरोऽ-

**मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः**
**प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।**
**यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये**
**दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२५॥**
**त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-**
**स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।**
**परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं**
**न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ॥ २६ ॥**

स्थि तु करोटी स्त्री' त्यमरः । 'शीलं स्वभावे सद्वृत्ते' इत्यमरः । 'आरम्भे च समूहे च भवेत् परिकरः पुमानिति' व्याडिः । अखिलं नाम स्मर्तॄणामिति स्मरणार्थयोगे कर्म्मणि न षष्ठी उत्तरत्र नित्यग्रहणेनानित्यत्वकल्पनादिति तत्रैवोक्तम् ॥ २४ ॥

सम्प्रति परमब्रह्मत्वेन संस्थापयन् स्तौति मन इत्यादि । प्रत्यञ्चतीति क्विप् प्रत्यक् प्रतिगतं चित्तं येन स परमात्मा तस्मिन् परमात्मनि । यमिनो योगिनो जनाः । सविधं सम्यक् यथा स्यात् तथा मन अवधाय निवेश्य यत् किमपि अनिर्व्वचनीयं अन्तस्तत्त्वं ब्रह्मस्वरूपमालोक्य आह्लादं परमसुखं दधति धारयन्ति । तदन्तस्तत्त्वं भवानेव किल निश्चये । अमृतमये ह्रदे अमृतपरिपूर्णे सरसि निमज्ज्य इव यथा अमृतसरोवरमग्ना अपि जना आह्लादं सुखं गच्छन्ति तथा योगिनोऽपि ब्रह्मदर्शनादाह्लादं दधति गच्छन्तीति भावः । योगिनः कीदृशाः आत्ताः पूरककुम्भकरेचकैः प्राणायामैर्वशीकृता मरुतो देहचारिवायवो यैः । पुनः कीदृशाः प्रहृष्यन्ति सुखोदयेन भक्त्यतिशयत्वाच्च हर्षयुक्तानि रोमाणि येषां रोमाञ्चितगात्रा इत्यर्थः । पुनः कीदृशाः प्रमदसलिलेन प्रमदजलेन प्रमदाश्रुणेति यावत् उत्सङ्गिता आवृता दृशश्चक्षूंषि येषां आनन्दाश्रुपरिपूर्णनेत्रा इत्यर्थः । विधानं विधिः तेन सह सविधं क्रियाविशेषणत्वात् कर्मत्वं विधानं युक्तं सम्यगित्यर्थः ॥ २५ ॥

इदानीं भगवतोऽष्टमूर्त्तित्वेन सर्व्वावयवत्वेन च सर्व्वात्मकत्वं उद्भावयन् स्तौति त्वमिति । त्वयि परमेश्वरे परिणता त्वद्भावबुद्धित्वेन परमार्थज्ञतया आत्मानं मन्यमाना पण्डितजनाः त्वमर्कस्त्वं सोम इत्यादिना परिच्छिन्नां परिमितां गिरं वाणीं बिभ्रति

**त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-**
**नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।**
**तुरीयन्ते धाम ध्वनिभिरवरुन्धानमणुभिः**
**समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥**

धारयन्ति संस्थापयन्तीति यावत् । वयन्तु स्थूलदर्शिनोऽनिपुणा इह संसारे त्वं यद्वस्तु न भवसि तत् अस्तीति न विद्मः न जानीम इति तत्त्वं निश्चितमेवेति । अर्काद्यष्ट-मूर्त्त्यात्मकतया वदतां मते अर्काद्यष्टवस्तु त्वमिति परिमितत्वं अस्मन्मते पुनः सर्व्वमयत्व-मिति अपरिमितमिति भेदः । अष्टमूर्त्तिमाह—त्वं अर्कः सूर्य्यः ईशानमूर्त्तिकत्वात् । त्वं सोमः चन्द्रः महादेवमूर्त्तिकत्वात् । त्वं पवनः वायुरसि उग्रमूर्त्तिकत्वात् । त्वं हुतवहः अग्निः रुद्रमूर्त्तिकत्वात् । त्वं आपः पयांसि भवमूर्त्तिकत्वात् । त्वं व्योम आकाशं भीममूर्त्तिकत्वात् । उ प्रश्ने अप्यर्थे वा । त्वं धरणिः पृथिवी सर्व्वमूर्त्तिक-त्वात् । त्वं आत्मा यजमानश्च पशुपतिमूर्त्तित्वेनेति । 'आत्मैव यजमानः स्याद्विषया-पत्तिसंक्रताविति' योगवासिष्ठीयवाक्यात् आत्मा यजमान उच्यते । केचित् आत्मा क्षेत्रज्ञ इति वदन्ति तन्न चारु ॥ २६ ॥

इदानीमोङ्कारस्य समस्तव्यस्ततया प्रसिद्धस्य प्रतिपाद्यं प्रतिपादयन् स्तौति त्रयीमिति । हे शरणद हे शिव ओमिति पदं ओँकारस्वरूपं यदा समस्तं अकारो-कारमकारैस्त्रिभिर्व्वर्णैर्मिलितं तदा अणुभिः सूक्ष्मैर्ध्वनिभिर्नादैः अवरुन्धानं आवृतं नाद-युक्तं सत् त्वां गृणाति आराधयति । तत् पुनरोमिति पदं यदा एवं तदा ते तव तुरी-यं धाम चतुर्थं तेजः ब्रह्मस्वरूपस्य तव ब्रह्मविष्णुशिवभेदेन यत् त्रिप्रकारं तेजः ततोऽ-धिकं तेजो हि चतुर्थं तत् पुनरनिर्व्वचनीयं नित्यानन्दस्वरूपं अभिदधत् प्रतिपादयत् अतस्त्वामेव गृणाति तव परमब्रह्मणश्चाभेदात् । धाम कीदृशं तीर्णा उत्क्षिप्ता विकृतयो विकारा येन निर्व्विकारमित्यर्थः । तथात्र श्रुतिः । 'अथासावकारोकारमकारात्मको मिलितः प्रणवत्वेनाविर्भूतो ब्रह्मतेजो वृणीतेति' । यदा पुनरोमिति पदं व्यस्तं अकारो-कारमकारत्वेन पृथग्भूतं तदा अकाराद्यैः अकारोकारमकारैस्त्रिभिर्व्वर्णैरक्षरैस्त्रय्यादीन् प्रत्येकेनाभिदधत् त्वामेव गृणाति । ब्रह्मणस्तव त्रय्यादिभेदेनाभिन्नत्वात् त्रय्याद्यभिधानेनैव ब्रह्माभिधानात् । त्रयीं ऋग्यजुःसामानि वेदान् अभिदधदित्यन्वयः । तथा च गायत्रीकल्पटीकाधृतव्यासवचनम् ।

**भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-**
**स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।**
**अमुष्मिन् प्रत्येकं प्रविचरति देवः श्रुतिरपि**
**प्रियायास्मै नाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२८॥**

अकारेणोच्यते ऋक्त्वमुकारेणोच्यते यजुः ।
मकारेणोच्यते साम समस्तेनोच्यते परम् ॥
तथा तिस्रो वृत्तीः सत्वरजस्तमोरूपा अभिदधत् । तथाच तत्रैव ।
अकारः सत्त्वमापन्न उकारो रजसाम्पतिः ।
मकारस्तमसां नाथ इति ब्रह्मगुणात्मकमिति ।

'जीवने वर्त्तने योषिद्वृत्तिर्ब्रह्मगुणेऽपि चेति' शाब्दिकनरसिंहः । तथा त्रिभुवनं स्वर्गमर्त्यपातालं अभिदधत् । तथा च श्रुतिः । 'अथातो वर्णत्रयात 'स्वर्गमर्त्यपाताला-नामभिधा नाम जानीते' इति । तथा त्रीनपि सुरान् ब्रह्मविष्णुशिवान् अभिदधत् । तथा च वर्णदेशना । 'अकारो ब्रह्म चाख्यात उकारो विष्णुरीरितः' इति शब्दार्णवः । 'मकारः कामहारकः' इति मन्त्राभिधानम् । एतेन ओमिति पदं समस्तमपि त्वां गृणाति किन्त्वेतावांस्तु विशेषः । यदा समस्तं तदा अभेदेनैव अभिन्नं तेजोरूपं त्वां गृणाति व्यस्तञ्चेत् भेदेन विभिन्नत्वं त्रय्यादिरूपं त्वामेव गृणातीत्यर्थः । यद्यपि विभिन्नवर्णस्वभावेन ओमिति पदं एकस्वरूपं न सम्भवति तदानीं प्रत्येकस्य पदत्वात् तथापि ओमिति समस्तघटकीभूतप्रत्येकाकारादिवर्णस्य ओमितिपदत्वमुक्तमिति ध्येयम् । केचित्तु ओमिति पदं यदा समस्तं समासनिष्पादितं अकारश्च उकारश्च मकारश्चेति द्वन्द्वसमासनिष्पादितं तदा त्वां गृणाति । यदा पुनर्व्यस्तं समास-निष्पादितभिन्नं अवतेरन्त्यस्वरादिलोपश्चेत्यनेन साधितं तदाऽपि त्वामेव गृणाति इत्यर्थं कुर्व्वन्ति ॥ २७ ॥

इदानीं भगवतः प्रधाननामाष्टकमुद्भावयन् स्तौति भव इति । हे शिव भव इत्यादि यदिदं अभिधानाष्टकं नामाष्टकं अमुष्मिन् नामाष्टके देवो महादेवः प्रविचरति प्रत्येकमवितिष्ठति भ्रमतीति यावत् । तथा श्रुतिरपि वेदोऽपि प्रत्येकं प्रविचरति अतो

**नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो**
**नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।**
**नमो वर्हिष्ठाय त्रिनयन यविष्ठाय च नमो**
**नमः सर्व्वस्मै ते तदिदमतिसर्व्वाय च नमः ॥२९॥**

अस्मै नाम्ने अहं प्रणिहितनमस्यः सम्पादितनमस्कारोऽस्मि भवामि । नाम्ने कीदृशाय प्रियाय नामसहस्रेषु प्राधान्यात् तव प्रियकराय । पुनः कीदृशाय भवते प्रकाशं कुर्व्वते भातेर्डवतुः ततश्चतुर्थी । यद्वा अमुष्मिन् नामाष्टके देवः शिवः प्रविचरति श्रुतिरपि अस्मै नाम्ने नामतदर्थाय प्रविचरति प्रकर्षेण विचरति धावति एतन्नामाष्टकं सम्भूतं सत्वरो भवतीति भावः । अत्र पक्षे हे भव ते तुभ्यं कृतनमस्कारो भवामीत्यर्थः । नामाष्टकमाह भव इत्यादि । सह महान् महादेवेन सह उग्र इत्यन्वयः । महान् इत्यनेन महादेव उच्यते यथा भीमो भीमसेनः । तथा च विष्णुपुराणे ।

रुद्र त्वं देवतात्मासि मा रोदीर्धैर्य्यमावह ।
भवं सर्व्वं तथेशानं तथा पशुपतिं द्विज ।
भीममुग्रं महादेवमुवाच स पितामहः ॥ इति ॥

'आख्याह्वे चाभिधानञ्च नामधेयञ्च नाम च' इत्यमरः । 'वेदे श्रवसि च श्रुतिरित्यमरः' ॥ २८ ॥

इदानीं परस्परविरुद्धधर्म्मत्वमुद्भावयन् स्तौति नम इत्यादि । हे प्रियदव हे प्रियदावाग्ने नेदिष्ठाय सर्व्वभूतगामित्वात् अतिनिकटवर्त्तिने ते तुभ्यं नमः । तथा दविष्ठाय वाङ्मनसोरतीतविषयत्वेन दुरधिगम्यत्वात् अति दूरस्थाय तुभ्यं नमः । नेदिष्ठमन्तिकतमम् । 'दवदावौ वनारण्यवह्नी । दवीयश्च दविष्ठ' श्चेत्यमरः । नेदिष्ठेति अन्तिकवाढ़योर्नेदसाधावित्यन्तिकस्य नेदादेशः । दविष्ठेति स्थूलदूरयुवक्षिप्रक्षुद्राणामन्तस्थादेर्लोपो गुणश्चेति । अत्र दूरस्थनिकटस्थत्वेन विरुद्धधर्म्मित्वं । तथा हे स्मरहर क्षोदिष्ठाय परमाण्वादिरूपेणातिक्षुद्राय तुभ्यं नमः । तथा महिष्ठाय पर्व्वतादिरूपेणातिमहद्रूपाय अतिपरिमाणदेहाय इति यावत् । ते तुभ्यं नमः । अत्रातिसूक्ष्मातिस्थूल-

**बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः**
**प्रबलतमसे तत्संहारे हराय नमो नमः ।**
**जनसुखकृते सत्त्वस्थित्यै मृडाय नमो नमः**
**प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥**

योर्विरुद्धत्वम् । क्षोदिष्ठेति क्षुद्रशब्दस्य पूर्व्ववदन्तस्थादेर्लोपो गुणश्च । महिष्ठेति महच्छब्दस्य तद्वदिष्ठे मेयः सुबहुलमिति कारितवद्भावादन्त्यस्वरादिलोपः । तथा हे त्रिनयन बर्हिष्ठाय सर्व्वेषामादिभूतत्वात् वृद्धतमाय नमः । तथा यविष्ठाय जरापरिणामादिदोषैरस्पृष्टत्वात् सर्वकार्य्यक्षमत्वाच्च अतियुवकाय तुभ्यं नमः । अत्रापि वृद्धत्वयौवनत्वयोर्विरुद्धत्वं । बर्हिष्ठेति 'प्रियस्थिरेत्यादिना' वृद्धस्य बर्हादेश इति धातुपारायणः । तन्मते गणसूत्रे बर्हादेशस्योक्तत्वात् । अस्मन्मते वर्षादेशस्य स्वीकारात् वर्षिष्ठाय इत्यपरः पाठः । यविष्ठेति युवन्शब्दस्य पूर्ववदन्तस्थादेर्लोपो गुणश्च । तथा सर्वस्मै परोक्षापरोक्षसर्वपदार्थत्वात् साकल्यरूपाय तुभ्यं नमः । तथा अतिसर्व्वाय वाङ्मनसोरतीतविषयत्वात् सर्वमतिक्रान्ताय च तुभ्यं नमः । अत्रापि सर्वातिक्रान्तत्वसर्वत्वयोर्विरुद्धत्वं अतिसर्व्वायेत्युपसर्जनत्वान्न सर्वनामत्वं ॥ २९ ॥

इदानीं त्रिगुणात्मकतया सृष्टिस्थितिप्रलयकर्तृत्वं गुणातीतत्वेन परमब्रह्मत्वञ्च उद्भावयन् स्तौति बहुल इत्यादि । भवत्यस्मादिति भवो ब्रह्मा भवाय सृष्टिकर्त्रे तुभ्यं नमः । कीदृशाय विश्वोत्पत्तौ जगदुत्पत्तिविषये बहुलं यथेष्टं रजो गुणो यस्य तस्मै रजोगुणात्मने इत्यर्थः । तथा हरति विश्वमिति हरो रुद्रस्तस्मै नमो नमः । तत् तस्य विश्वस्य संहारे प्रलयविषये प्रबलमनिर्वचनीयं तमो गुणो यस्य तस्मै तमोगुणात्मने इत्यर्थः । तथा मृडयति सुखयतीति मृडः विश्वपालकत्वात् विष्णुरूपस्तस्मै नमो नमः । कीदृशाय सत्त्वस्थित्यै आत्मनि सत्त्वगुणस्थितितदर्थाय । जनानां सुखं करोतीति क्विप् तस्मै सत्त्वगुणाधारतया विश्वपालकत्वेनैव जनसुखकर्त्रे इत्यर्थः । यद्वा सत्त्वेन सत्वगुणेन स्थितिं पालनं कर्त्तुं जनसुखं कर्म्म नित्यं कर्म्मणि तुमोऽप्रयोगिन इति चतुर्थी । तथा प्रमहसि प्रकृष्टतेजोरूपे पदे वस्तुनि अर्थादधिष्ठात्रे परमब्रह्मणे शिवाय नमो नमः । पदे कीदृशे त्रिगुणा एव त्रैगुण्यं स्वार्थे यण् निर्गतं त्रैगुण्यात् निस्त्रैगुण्यं तस्मिन् अतीतगुणत्रये इत्यर्थः । 'मह उद्धवतेजसोरित्यमरः । पदं

**कृशपरिणति चेतः क्लेशवश्यं क्व चेदं**
**क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।**
**इति चकितममन्दीकृत्य मां भक्तिराधा-**
**द्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥**
**असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रं**
**सुरतरुवरशाखा लेखनी पत्रमुर्वी ।**
**लिखति यदि गृहीत्वा शारदा सर्व्वकालं**
**तदपि तव गुणानामीश पारं न याति ॥ ३२ ॥**

व्यवसितित्राणस्थानलक्ष्याङ्घ्रिवस्तुष्वित्यमरः' । भक्त्युद्रेकेण विस्मयेन हर्षेण च नमः-पदवाहुल्यमित्यपौनरुक्तं । तथा च 'विवादे विस्मये हर्षे द्विस्त्रिरुक्तिर्न दुष्यतीति' दृश्यते । 'सत्त्वं गुणे पिशाचादावित्यमरः' ॥ ३० ॥

इदानीं आत्मनो विनयमुद्भावयन् स्तौति कृशेति । हे वरद कृशा क्षीणा परिणतिः परिणामो गम्यो यस्य अल्पगम्यमिति यावत् । तादृशं मम इदं चेतः मनः क्व । चेतः कीदृशं क्लेशवश्यं क्लेशस्य दुःखस्य अधीनं दुःखेन जड़ीभूतं शश्वत् वारं वारं गुणसीमानं गुणानामियत्तां परिच्छेदं उल्लङ्घयितुं अतिक्रमयितुं शीलं यस्यास्तादृशी तव ऋद्धिः समृद्धिर्व्वा क्व । एतादृशी तव समृद्धिः ममाल्पविषयचेतसोऽगम्येति अत्यन्तासम्भावनायां द्वौ क्वौ प्रयुक्तौ अत्रापीति हेतोः चकितं भीतं मां भक्तिः कर्त्त्री अमन्दीकृत्य निःशङ्कीकृत्य तव चरणयोः पादयुगले आधात् अर्पितवती । यद्यपि तव चरणारविन्दस्तुतिकरणे मम चेतसोऽयोग्यतेति हेतोरहं भीतोऽस्मि तथापि त्वच्चरणयोः मम या भक्तिः सैव मां निर्भीकं कृत्वा बलात्कारेणैव अर्पितवतीति भक्तिर्ब्बलवतीति ध्वनितम् । मां कीदृशं वाक्यमेव पुष्पोपहारः कुसुमबलिर्यस्य वाक्यं स्तुतिः सैव पादपूजायां पुष्पोपहार इत्यर्थः । अमन्दीकृत्येति च्विप्रत्ययः ॥ ३१ ॥

इदानीमृद्धेर्गुणसीमोल्लङ्घनीत्वमासादयति असितेति । हे ईश यदि असित-गिरेर्नीलपर्व्वतस्य समं तुल्यं कज्जलं मसिः स्यात् । कज्जलं कीदृशं सिन्धुः समुद्रः

**कुसुमदशननामा सर्व्वगन्धर्व्वराजः**
**शिशुशशधरमौलेर्द्देवदेवस्य दासः ।**
**स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्**
**स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३३ ॥**
**सुरगुरुमभिपूज्य स्वर्गमोक्षैकहेतुं**
**पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।**
**व्रजति शिवसमीपं किन्नरैः स्तूयमानः**
**स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३४ ॥**

पात्रं मस्याधारो यस्य तादृशं । तथा सुरतरोः पारिजातवृक्षस्य वरशाखा प्रधानशाखा यदि लेखनी स्यात् तथा उर्व्वी पृथ्वी यदि पत्रं स्यात् एतानतिबृहत्तया चिरस्थायिनो गृहीत्वा आदाय शारदा सरस्वती सर्व्वकालं युगमन्वादिरूपं व्याप्य लिखति गुणानां लेखनं करोति तदपि तथापि तव गुणानां पारं पर्य्यन्तं न याति न प्राप्नोति । एतेन तादृशसामग्रीसहकारेण सरस्वत्यपि तव गुणानां इयत्तापरिच्छेदं कर्त्तुं न शक्नोति कथमल्पविषयचेतसामस्माकं तत्रारम्भ इति गुणकीर्त्तनविषये सर्व्व एव कुण्ठाः तथापि तत्र यदारम्भः तत्र भक्तेरेव बलवत्ता कारणमिति पूर्वश्लोकेन ध्वनितम् । 'वाग्वाणी शारदा सत्या ब्रह्मपत्नी सरस्वतीति' व्याडिः ॥ ३२ ॥

इदानीं स्तवप्रकाशे कारणमासादयति कुसुमेति । कुसुमानीव दशना दन्ता यस्य स कुसुमदशनः पुष्पदन्तः स एव नाम यस्य स पुष्पदन्तनामा सर्वगन्धर्वाणां राजा अन् । देवदेवस्य शिवस्य दासः । अस्य शिवस्य रोषात् निर्म्माल्यपादस्पर्शनेन क्रोधात् निजमहिम्नो गगनचरणादिस्वकीयमहिमतो भ्रष्टश्च्युतः सन् इदं महिम्नः स्तवनमकार्षीत् प्रकाशितवान् । देवदेवस्य कीदृशस्य शिशुर्बालः शशधरश्चन्द्रः इत्यर्थः मौलौ शिरसि यस्य अर्द्धचन्द्रखण्डभूषितस्य । स्तवनं कीदृशं दिव्यात् मनोज्ञात् दिव्यं मनोज्ञं अतिमनोज्ञमिति यावत् ॥ ३३ ॥

इदानीं महिम्नः स्तवपाठफलमाह सुरगुरुमिति । सुराणां देवतानां गुरुं महादेवं अभिपूज्य पूजयित्वा प्राञ्जलिः कृताञ्जलिः सन् यदि पुष्पदन्तप्रणीतं

**श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन**
**स्तोत्रेण किल्बिषहरेण हरप्रियेण ।**
**कण्ठस्थितेन पठितेन गृहस्थितेन**
**संप्रीणितो भवति भूतपतिर्म्महेशः ॥ ३५ ॥**

**इति श्रीपुष्पदन्तगन्धर्व्वराजविरचितं**
**हरमहिम्नः स्तोत्रं समाप्तम् ।**

पुष्पदन्तेन प्रकाशितं इदं स्तवनं स्तोत्रं पठति तदा स जनः किन्नरैः स्तूयमानः सन् शिवसमीपं व्रजति गच्छति । सुरगुरुं कीदृशं स्वर्गस्य मोक्षस्य च एकहेतुं मुख्यकारणं । स्वर्गमोक्षकारणीभूतशिवसमीपगमनेनैव स्वर्गमोक्षमपि लभत इति भावः । मनुष्यः कीदृशः सन् पठति न विद्यते अन्यस्मिन् विषये चेतो मनो यस्य तादृशः अनन्यचित्त इत्यर्थः । स्वरेऽक्षरविपर्य्यय इति नाक्षरविपर्य्ययः वक्ष्यमाणकचिदधिकारस्वीकारात् । स्तवनं कीदृशं अमोघं अव्यर्थं शिवसमीपगमने अव्यर्थकारणमित्यर्थः । 'मोघो व्यर्थे खले पुमानिति' शब्दार्णवः । 'एके मुख्यान्यकेवलाः' इत्यमरः ॥ ३४ ॥

अन्यदपि फलमाह श्रीपुष्पेति । अनेन स्तवेन कण्ठस्थितेन कण्ठायत्तेन पठितेन आवृत्तेन गृहस्थितेन पुस्तकलिखिततया गृहस्थितेन च भूतानां प्राणिनां पतिर्महेशः शिवः संप्रीणितो भवति अस्मिन् प्रीणिते सकलपुरुषार्थसिद्धिरिति भावः । कीदृशेन स्तोत्रेण पुष्पदन्तस्य गन्धर्वराजस्य मुखपङ्कजान्निर्गतेन पूर्व्वं देवप्रतिपादितमपि गुप्तमासीत् पश्चादनेन प्रकाशितमिति भावः । एतेनानादित्वमस्येति तात्पर्य्यम् । पुनः कीदृशेन किल्बिषहरेण पापनाशकेन । पुनः कीदृशेन हरस्य शिवस्य प्रियेण प्रीतिजनकेन ॥ ३५ ॥

**इति श्रीजगन्नाथचक्रवर्त्तिविरचिता हरमहिम्नः स्तवटीका समाप्ता ।**

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.